# भूमिका

संस्कृतभाषा सर्वासु भाषासु श्रेष्ठा गरिष्ठा परिपूर्णा च वर्तते। अनेन कारणेन भाषेयं समादृताऽस्ति। अस्यामेव भाषायाम् मनुष्याणाम् सर्वविधरूपेण पुरुषार्थचतुष्टयस्य प्राप्तिसाधनानि निहितानि सन्ति। अतएव सर्वेषां विदुषामेव मतमिदं यत् संस्कृताध्ययनेनैव मानवाः मानवा भवन्ति एतादतिरिक्ताध्ययनेन केवलं नराभवन्ति।

सौभाग्यमेतस्माकम् यद् वयं संस्कृताध्ययनेन रतास्मः। संस्कृताध्ययनेन केवलं कल्याणं नैव अपि च तद् विषयाणामन्वेषणमपि आवश्यकम् इति। एतदेव मया अनुसन्धित्सुरूपेण उद्यतोभूतोजातः।

भारतीयवाङ्गमये वेदानाम् अतीव महत्त्वं वर्तते। यतो हि वेदः परब्रह्मणः मुखपद्पाद् विनिसृतः। अतएव भारतीयमताधारेण वेदः औपरुषेय कथ्यते। वेदानामेव अपरभागः उपनिषरूपेण स्वीक्रियते, तत्र वेदेषु विभागत्रयं वर्तते-कर्म-ज्ञानंःउपासना चेति।

मनुष्यजीवने एतत्रयमावश्यकं चेति अस्य उपलब्धये मनुष्याः धर्मादिपुरुषार्थ चतुष्टयं स्वीक्रियन्ते, वेदेषु धर्मादीनां स्वरूपविषये किच्चिदपि पृथग्रूपेण नैवापलभ्यते। वेदात्तरसाहित्ये पुरुषार्थचतुष्टयस्य विषये सर्वत्र साहित्य प्रमाणं च प्राप्यते। वेदानामेव अन्तिमोभागः, उपनिषदः सन्ति तत्र पुरुषार्थचतुष्ट्यात् पूर्वम् कर्मोपासना ज्ञानादीनां विवेचनं सम्यगुपलभ्यते, मनुष्यजीवने

कर्म एव प्राधान्यं अनेन हि ईशोपनिषदि कुर्वन्नेह कर्मणि -- इत्यादिनामुल्लेखः कृतः।

कर्मबिना जीवनं नैव सिद्धयति अनयोक्तयाधारणप्रथमे हि कर्मविषयकं चिन्तनमावश्यकमिति। धर्मस्यापि पयार्यरूपेण कर्म गृहीतं अनेकेषु स्थलेषु तस्मात् कारणात् किं नाम कथं च क्रियते, कतिविधं च तत् एतस्य कर्मणः विविधान् प्रकारान् आहत्य कर्म विषयकं निरूपणम् आवश्यकमिति विचिन्त्य मया कर्म सिद्धान्त विषयकं निरूपणम् आवश्यकमिति विचिन्त्यं मया कर्मविषयक अध्ययनं स्वीकृतमिति।

संस्कृत वाङ्गमये यस्य कस्यापि विषयस्य यदामूलं अन्विष्सते तदा सर्वे वेदामनुसरन्ति।

यथोक्तं मनुना -- सर्व वेदात् प्रसिद्धयति।

सर्ववेदमयो हि सः।

इत्यादिभिः उदाहरणं ज्ञायते यत् सर्वविषयानां मूलं वेदेषु वर्तते। अनेन वेदानामेव भागः उपनिषदः सन्ति, तर्हि उपनिषत्साहित्ये कर्म सिद्धान्त निरूपणम् कथं जातम् इत्यादिकमन्मेषणमावश्यकं अतएव मया ''उपनिषत्सु कर्मसिद्धान्तनिरूपणम्'' इति विषयमङ्गीकृत्य कार्यमुत्सहे।

अथ उपनिषत् शब्दस्य का परिभाषा, कतिविधा च ताः के के विषयः तासु इत्येषां समेषां विषयाणां अध्ययनं पर्वूमावश्यकम्।

1. उपनिषत् शब्दार्थः।
2. उपनिषत् परिभाषा।
3. उपनिषत् संख्या।
4. उपनिषत वर्ण्यविषयः, ज्ञान-कर्मोपासना।
5. उपनिषत्सु कर्ममीमांसा।
6. उपनिषदां समीक्षणम्।
7. उपनिषद् भाष्यकाराणां मतम्।

सर्वैः भाष्यकारैः उपनिषदग्रंथाना प्रमाणं वेदवदस्वीक्रियन्ते सर्वे च प्रसथानत्रयीरूपेण स्वीकृतस्य भाष्यं कृतामित।

उपनिषच्छब्देन च व्याचिख्यासितग्रन्थप्रतिपाद्यवेद्यवस्तुविषया विद्योच्यतेकेन पुनरर्थयोगेनोपनिषच्छब्देन विद्योच्यते इति उच्यते।उपनिषदो वृत्तिर्नाऽऽरब्धव्या प्राणिनां कामकलुषितचेतसामुप -निषच्छ्रवणात्पराङ्गमुखत्वाद्वि -शिष्टस्याधिकारिणो दुर्निरूपत्वाद्बन्धस्य च सत्यस्य कर्मभ्य एव नार्थस्योपनिपुर्वस्य क्विप्प्रत्ययान्तस्य रूपमुपनिषदिति।

ये मुमुक्षवो दृष्टानुश्रविकविषयतृष्णाः सन्त उपनिषच्छब्दवाच्यां -वक्ष्यमाणलक्षणां विद्यामुपसद्योगम्य तन्निष्ठतया निश्चयेन शीलयन्ति तेषामविद्यादेः संसारबीजस्य विशरणाध्दिसनाद्विनाशनादित्यनेनार्थयोगेन विद्योपनिषदित्युच्ये ।तथा च वक्ष्यतिनिचाय्य तन्मृत्युमुखात्प्रमुच्येति ।

लोकादिर्ब्रह्मजज्ञो योऽग्निस्तद्विषयाया विद्याया द्वितीयेन वरेण प्रार्थ्यमानायाः स्वर्गलोकफलप्राप्तिहेतुत्वेन गर्भवासजन्यजराद्युपद्रवृन्दस्य लोकान्तरे पैानःपुन्येन प्रवृत्तस्यावसादयितृत्वेन पूर्वोक्तविशेषेणान्मुमुक्षून्वा परं ब्रह्म गमयतीति ब्रह्मगमयितृत्वेन योगाद्ब्रह्मविद्योपनिषद्। तथा च वक्ष्यति ब्रह्म प्राप्तो विरजोऽभीद्विमृत्युःइति ।स्वर्गलोका अमृतत्वं

भजन्ते।

ननु चोपनिषच्छब्देनाध्येतारो ग्रन्थमप्यभिलपन्ति। उपनिषदमधी -महेऽध्यापयाम इति च। नैष दोषोऽविद्यादिसंसारहेतुविशरणादेः सदिधात्वर्थस्य ग्रन्थमात्रेऽसम्भवाद्विद्यायां च सम्भवात्।ग्रन्थस्यापि तादर्थ्येन तच्छब्दतवोपपत्तेः। आयुर्वै घृतामि त्यादिवत् । तस्माद्विद्यायां मुख्यया वृत्त्योपनिषच्छब्दो वर्तते ग्रन्थे तु क्तयेति। एवमुपनिषन्निर्वचनेनैव

विशिष्टोऽधिकारी विद्याया -मुक्तः। विषयश्च विशिष्ट उक्तो विद्यायाः परं ब्रह्म प्रत्यगात्मभुतम् ॥

ब्रह्मविद्यायामुपनिषच्छब्दस्यो पनिषदं भो बूहीत्यादिप्रयोगदर्शना -द्धात्वर्थमाह ।क्लृप्तावयवशक्त्यैव प्रयोग सम्भवे समुदायशक्तिरूपनिषच्छब्दस्य न कल्पनीयेत्याह। षद्लृ विशरणगत्यवसादनेष्विति धातोर्विशरणमर्थमादाय योगवृत्तिमाह। विषयेषु क्षयिष्णुत्वादिदोषदर्श -नाद्विराः केचन मुमुक्षवः प्रसिद्धा न सर्वे भवादृशाः कामुका एवेति यच्छब्देन प्रसिद्धावद्योतकेन कथयति। आनुश्रविकाः शब्दप्रतिपन्नाः स्वर्गभोगादयः।

आचार्योपदे शाल्लब्ध्वा यावत्साक्षात्कारं शीलयन्ति संसार्यसार्यैक्यासम्भावनादि निरस्यन्तीत्यर्थः। अग्निविद्यायामप्यवसाद -नमादायोपनिषच्छब्दस्यवृत्तिमाह रादिलोकानामादिः प्रथमजो ब्रह्मणो जातो ब्रह्मजः स एव जानातीतिज्ञः। उपचारेणोपनिषच्छब्द प्रयोग इत्यर्थः। उपनिषच्छब्दनिर्वचनेन सिद्धमर्थमा । आत्यन्तिकी निदाननिवृत्त्या निवृत्तिर्विवक्षिता। निदानं चान्वयव्यतिरेकशास्त्रान्यायेभ्यः संसारस्या -ऽत्मैकत्वाविद्या। सा च न कर्मणा विनिवर्ततेऽतो विद्यायाः प्रयोजनेन साध्यसाधनलक्षणः सम्बन्ध इत्यर्थः। ननुचोपनिषच्छब्देनाध्येतारो

ग्रन्थमप्यभिलपन्ति। उपनिषदमधीमहेऽध्यापयाम इति च । नैष दोषोऽविद्यादिसंसारहेतुविशरणादेः सदिधात्वर्थस्य ग्रन्थमात्रेऽसम्भवाद्विद्यायां च सम्भवात्। ग्रन्थस्यापि तादर्थ्येन तच्छब्दतवोपपत्तेः।इति आनन्दगिरि टीकानुसारतः

प्राणिनां कामकलुषितचेतसामुपनिषच्छ्रवणात्पराङ्मुखत्वेनविवेकादिमतोऽधिकारिणोदुर्लभत्वादुपनिषद्भिर्तृत्वादिविशिष्टजीवस्यासंसारिब्रह्मात्म -ताया प्रतिपादयितुमशक्यत्वेन ब्रह्मात्मैक्यविषयाभावादेव प्रयोजनमपि न लभ्यते बन्धस्य सत्यत्वेन विद्यायास्तन्निवर्तकत्वायोगात्कर्मभिरेव तन्निवृत्तेः सम्भवाच्चात एव सम्बन्धो नेत्याशङ्क्योपनिषच्छब्दस्वरूप -निष्पित्तिप्रकारं तावादाह शिथिलिकरणप्राप्तिनाशार्थकस्य क्विबिति प्रत्ययोऽन्ते यस्य स तथा तस्य सदेर्धातोरूपपूर्वस्य निपूर्वस्यरूपं निष्पन्नशब्दस्वरूपमुपनिषदित्यर्थः एवमुपनिषच्छब्दस्वरूपं निरूच्यो -पनिषदं भो ब्रूहीत्यादौ ब्रह्मविद्यायामुपनिषच्छब्बप्रयोगदर्शनादुप निषच्छब्देन ब्रह्मविद्योच्यत। उश्रुतिप्रसिद्धद्योतकश्च शब्दः। व्याख्यातुमिष्टो ग्रन्थ उपनिषद्रूपस्तस्य प्रतिपाद्यमधिकारिणश्च वेद्यं यद्वस्तु ब्रह्मात्मैक्यं तद्विषयो यस्याः सा तथा।ननूपनिषच्छब्देन विद्या किं समुदायशक्त्याऽभिधीयत

उतावयवशक्त्या। नाऽऽद्यः।लोके विद्यायामुप -निषच्छब्दस्य प्रयोगाभावेन समुदायशक्तेक्लृप्तत्वात्कल्प्यायाश्च क्लृप्तावयवशक्त्या बाध्यत्वात्। अर्थयोगोऽर्थसम्बन्धस्तेन कमर्थं सम्बन्धमादायोनिषच्छब्देन विद्योच्यते इत्यर्थः। उरीत्या न समुदायार्थौ नाप्यवयवार्थ इति भावः। षद्लृ विशरणगत्य- वसादनेष्विति स्मृतेरूपनिषच्छब्दस्यावयववृत्तिं विद्यायां दर्शयिष्यामीत्याह।दृष्टाः प्रत्यक्षेण स्त्रकचन्दनवनितादयः शब्दश्रवणमनुगम्या आनुश्रविकाः। ते च ते विषयाश्च तेभ्यः क्षयिष्णुत्वसातिशयत्वादिभिर्हेतुभि र्विगता तृष्णाऽऽशा येषां ते तथारूपाःसन्तः।इदमुपलक्षणं शमादेः। मोक्षेच्छवः प्रसिद्धाः शान्तो दान्तो इत्यादौ वक्ष्यमाणलक्षणं स्वरूपं यस्याः सा तां विद्यामुपसद्योगपगम्य प्राप्येत्यर्थः। निशब्दार्थमाह॥

तस्यां निष्ठाऽनन्यव्यापारता येषां ते तन्निष्ठास्तेषां भावस्तन्निष्ठता तया निश्चयेन फलावश्यकत्वबुद्धया शीलयन्त्यसंसार्यैक्यासंभावनां निरस्यन्ति साक्षात्कारपर्यन्तमित्यर्थः। धात्वर्थद्वयं संगृह्याऽऽह संसारबीजस्य कर्तृत्वादि-कारणस्याविद्यादेरादिपदेन कामकर्मादिपरिग्रहः विशरणादित्यस्य व्याख्यानं विशसनादिति। शिथिलीकरणादित्यर्थः। अवसादनार्थमाहउार्थमुपसंहरति - उक्तेऽर्थे श्रुतिं प्रमाणयति।

**सदेगत्यर्थमादायाऽह-**

कतृत्वाद्यनर्थमूलाविद्यां निहत्य पूर्वोक्तविशेषणान्साधनचतुष्टय सम्पन्ना- न्सादयति परब्रह्म गमयतीति व्युत्पत्त्या ब्रह्मगमयितृत्वयोगेन योगात्सम्बन्धाद् ब्रह्मविद्योपनिषच्छब्देनोच्यत इत्यर्थः।विद्यया ब्रह्मप्राप्तो विगतं रजो यस्मात्स विरजोऽज्ञानशून्योऽभूत।अत एव कार्यनिवृत्तरित्याह- मृत्योर्मरणोपलक्षित- संसाराद्विगत इत्यर्थः।

ननु व्याचिख्यासितग्रन्थप्रतिपाद्यविद्योपनिषच्छब्देनोच्यत इत्युक्तम्। तथात्वेऽग्निविद्याऽप्रकाशापत्तेरित्याशङ्क्य सदेरग्निविद्याया -मवसादनविशर्णाथ बादायोपनिषच्छब्देनोच्यत वृत्तिमाह। लोकानामादिः प्रथमजो ब्रह्मणो जातो ब्रह्मजः स एव जानातीति ज्ञस्तद्विषयायाः अग्निविषयायाः।जरादीत्यादिपदेन मरणदिसंग्रह्मः।वृन्दस्य समूहस्या -वसादयितृत्वेन धात्वर्थयोगादग्निविद्याऽप्युपनिषच्छब्देनोच्यत इत्यन्वयः। इतरक्रियातो वैषम्याह- उेऽर्थे वाक्यशेषं प्रमाणयति। स्वर्गलोका यजमाना अमृतत्वं देवत्वं भजन्ते प्राप्नुवन्तीत्यर्थः। उपनिषच्छब्दस्य ग्रन्थेऽध्यापकाध्येतृप्रसिद्धविरोधं शङ्कते- प्रथमचकार एवकारार्थः क्रियान्वयी द्वितीयः प्रयोगद्वयसमुच्चयार्थः उपपादित योगार्थस्य विद्यायामेव सम्भवात्सैव

तत्छब्देनोच्यते इति परिहरति। अविद्याकामकर्मेत्येवमादिर्यः संसारस्तस्य कर्तृत्वादेर्हेतुस्तस्य विशरणादेरादिपदेन गत्यवसादनयोर्ग्रहणं भवति। ननु ग्रन्थे प्रयोगःकथमित्यत आह- तादर्थ्येनेति सोऽर्थः प्रयोजनं यस्य स तदर्थस्तस्य भावस्तादर्थ्यं तज्जनकत्वेनेति यावत्। स शब्द उपनिषदिति यस्य स तच्छन्दस्तस्य भावस्तच्छब्दत्वं तस्योपपत्तेः सम्भवादित्यर्थः। तज्जनके तच्छब्दप्रयोगे दृष्टमाहआयुष्प्रदे धृत आयुष्पदवदित्यर्थः । ग्रन्थे तु भक्त्येति लक्षणयोपनिषच्छब्दप्रयोग इत्यर्थः ।

उपनिषन्निर्वचनमुपनिषच्छब्दस्य योगार्थकथनं तेन विशरणावसाद - नार्थानुगमेन विद्याया विवेकादिविशेषणविशिष्टोऽधिकार्युौ गत्यर्थानुगमेन मुमुक्षुशब्दिततत्वम्पदलक्ष्यप्रत्यगात्मभूतं परं ब्रह्म विद्याया विशिष्टोऽसाधातणो विषय उेऽस्या विद्यायाः प्रयोजनं चाविद्यानिवृत्तिद्वारा संसारनिवृत्तिरात्यन्तिक्यारोपिताभावस्याधिष्ठानात्मकत्वेन ब्रह्मप्राप्ति -लक्षणा निवृत्तिः। अथवा ब्रह्मप्राप्तिस्तद्रूपनिरति शयानन्दप्राप्तेर्लक्षणा ज्ञापिकेत्यर्थः॥

ऐहिकधर्मार्थकामसाधनार्थपरत्वेनग्वेदादयोऽप्रधानवृत्या ‘अपरे’ति पदेन मुख्यावृत्तया मोक्षैकसाधनभूतब्रह्मविद्यााधिग्मिहेतुत्वेन च पुनरुपनिषदः ‘परे’ति वदने व्यपदिश्यन्तेतरामिति व्यक्तमेव विदुषाम्। संजेगीयते च ब्रह्ममविद्यत्यपरसंज्ञयापीयमुपनिषद्विद्या। उप-नि-पूर्वकस्य विशरणत्यवसादनार्थकस्य षद्लृधातोः विश्वशबन्तस्य

रूपमिदमुनिषत्। उप–गमम्य गुरुमाचार्यमुपलभ्य वा ब्रह्मोपदेशं, तन्निष्ठतया पशिीलतायता दृष्टानुश्रावकविषयवितृष्णानां मुमुद्क्षूणामविद्यादेः संसारवीजस्य, नि–नितरां निश्लेषेण वा सद्–अवसाद्यित्री विशायादयितृी विशरणकर्त्री तद्द्वारा ब्रह्मोपगमपियित्री या सोपनिषदिति तद्वयुत्पत्यर्थनिबन्धना सती ब्रह्मविद्यापि सा, इति वचोऽपि नितरो रोचिष्णु खलु। न चोपनिषदामेव पराविद्यात्वं कथं? वेदेष्वपि बहुत्र तदुपदेशश्रवणात्तेषामपि पराविद्याात्वं किन्न खलु। न चोपनिषदामेव पराविद्यात्वं किन्न खलु सोपपत्तिकमिति वाच्यम्, वेदेष्वप्रधान्येन उपनिषत्सु च पुनः प्राधान्येनम मुख्यवृत्तया च तदुपनिबन्धनात्। वेदेषु प्राध्धन्येनबीयुदयफलकस्य, कर्मोपासनाविज्ञानसाधनस्य, भगवत्परब्रह्मप्रभाप्रत्यायकस्य, धर्मार्थकाम –रूपत्रिवर्गस्यैवोपदेशः। उपनिषत्सु तु मुख्यवत्या ब्रह्मविद्यैकसाधनस्य त्रिविधदुःखविप्रमोक्षस्य मोक्षस्यैवोपदेश इति उपनिषदामेव परा विद्येति पदेन प्राधान्येन व्यपदेशो यौक्तिको न वेदानाम्। एतावता उपनिषदां वैशिष्ट्येन ब्रह्मविद्यात्वं संसायते, न जातु वेदानां तद्वत्वं तावता परिबाध्यत इत्यवधेयम्।[1]

प्राणीनां वाह्यार्थानाम् प्रकाशितुम् याः समर्थाः ताः उपनिषदः। एतेषु ग्रन्थेषु अनकाः विद्याा सन्ति। परमपुरुषार्थस्य

प्राप्ति साधनिकाः उपनिषदः क्लेश ग्रस्त जीवानां, क्लेशनिवारणोपायाः उपनिषदः कथयति।

**उपनिषदां का आवश्यकता ?**

एतद् विषये शास्त्रदृष्ट्या कथयितुम् शक्यते आत्मज्ञानम् सर्वोपरि उपयोगिता एतद् ग्रन्थानाम्। अध्यात्मविद्याविद्यानाम्[1] अनुसारेण भगवानकृष्णः कथयति विद्यासु अहं अध्यात्मविद्याऽस्मि।

अपि च

''साविद्याया विमुक्तये।''

उपनिषदः जीवने उपयोगिविषये कथयितुम् शक्यते –उपनिषादयति सर्वानर्थकरसंसार विनाशयति संसार कारणभूतविद्यां च शिथिलयति, ब्रह्म च गमयति इति उपनिषदः। एतेन उपनिषदां उपयोगिता वरीवर्त्य। यतोऽभ्युदययन्तिः श्रेययसिद्धिः स धर्मः। इति

सूत्राधारेण अभ्युदयं येन भवति सा धर्मः। तर्हि उपनिषदाध्ययनेन अभ्युदयं जायते। तेन उपनिषदादभिः धर्मः भवति। अर्थोऽपि उपनिषदांध्ययनेन उपलभ्यते।

विविधाः कामनाः अनेन प्राप्ताः भवन्ति।

यथा – तैत्तरीये –सत्यं ज्ञानमनन्तं ब्रह्म। या वेद निहितं गुहायां परमे व्योमन्।

सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपाश्रिता।''

अनेन मंत्रेण एतद्सिद्धम् भवति। अपि च

चतुर्थपुरुषार्थः मोक्षः वर्तते। मोक्षस्य प्राप्तिर्रेव उपनिषदां उद्देश्यं उपयोगित्वं च ---

एतज्ज्ञेयं नित्यमेवात्मसंस्थं ।

नात:परं वेदितव्यं हि किञ्चित।।

अपि च

यदा सर्वे प्रमुच्यन्ते कामायेऽस्य हृदिश्रिताः।

अर्थ मर्त्योऽमृतो भवति।।

सर्वासु उपनिषत्सु यज्ज्ञानं य उपायाः याः शिक्षा तत् सर्वम् तत्र वर्तते -- इष्यते च सर्वोपनिषदां सर्वात्मैक्य प्रतिपादकत्वम्।

मनुष्यजीवने किम् वैशिष्ट्यं भवेत्, किम् उद्देश्यम् भवेत्, किम् प्रयोजनं च भवेत् इत्याकांक्षायां उपनिषदांध्ययनेन समादधयति। एतदेव उपनिषदां उपयोगिता सिद्धयति।

इमाह खलु प्रधानोपनिषदाः वेदांतपदेनापि संज्ञायन्ते तत्र वेदांगतत्वम् तु आसाम् वेदप्रतिपाद्येषु कर्मोपासना लक्षणेषु त्रिविध काण्डेषु मुख्यतवेन अन्तिमस्य ज्ञानकाण्डस्य प्रतिपादनात् वा यजुर्वेदस्य अन्तिम आध्यात्मक - ईशोवास्येत्यादि मन्त्रेण

उपनिषदां उपक्रान्तत्वाद् वा । न च पुनः इयमेव उपनिषदेव नाम वेदांग तत्वम् न पुनः अन्याषाम् इति वक्तव्यम्।

एताषु उपनिषत्सु यो प्रतिपाद्यो विषयः वर्तते सो विषयः मनुष्यजीवने अतिउपयोगिता रूपेण सिद्धयति। कर्मान्तरेण केवलं तत्वज्ञानं पंगुतत्वज्ञानम् कर्मकलापोऽपि अन्धः एव तत् उभे इमे इतरेतर विधुरे मानव जीवनस्य उपनिषदभिः चर्मोरद्देश्यत्वम् व्यवस्थापिते मोक्षादिगमे उक्क्षमताम् गते उपनिषन्निदिष्टोद्देशात्प्रच्यवमाने कथामिव तत्सिद्धान्तमुपपादयितुं परिवृढे स्याताम्। स एव केवलमुनिषदां चरमप्रयोजनं साधयितुं यथा क्षमाः न तु केवलं कर्म, नाऽपि केवलं ज्ञानमेवेति, अपितु ज्ञानसहकृतकर्मैव तत्साधकम् इति विवेकः। उक्तं च --

विद्याञ्चाविद्याञ्च यस्तद्वेदोभय सह ।
अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते।। **ईशोप.**

## प्रेरणादातारः

अस्मिन शोधकार्ये ये-ये महाभागानाम् औदार्यरूपेण, प्रेरणारूपेण सहयोगः प्राप्तः तेषां कृते कार्तज्ञं निवेदनं क्रियते।

प्रथमे हि मदीया पू. गुरुचरणाः ब्रह्मलीनः श्री दानीदत्त झा महाभागः सन्ति। तेषां कृपाप्रसादात् अयं शोधप्रबन्धः परिपूर्णो जातः। तेन कृपाप्रसादात् आशीर्वचोभिः एव कार्यम् जातम्। तेन प्रति प्रणामाञ्जलिः।

प्रेरणास्रोत रूपेण मम पितरौ पूज्य श्री लम्बोदर झा माातश्री श्रीमती कलादेवी झा एषां कृपा प्रसादेन संस्कृताध्ययनेन प्रवृत्तः जातोऽहं। एतयोः चरण कमलयोः सादरं प्रणतिपूर्वकं आशीर्वचोभिः एव कार्यम् जातम्। एतयोः प्रति केवलं दीर्घायुस्यम् प्राप्तये भगवतः प्रार्थनां करोमि।

भार्याभारविमोचनी उक्त्याधारेण मम् सहधर्मिणी नीतू अपि अस्मिन् कार्ये अनेक विधं सहयोगं दत्तवती साऽपि साधुवादार्हः।

पर्यन्ते च शोध प्रबन्धस्य कार्यनिष्पादनाय मार्गदर्शकरूपेण डॉ. रामपालशुक्लमहाभागाः ये सततं छात्रहितेच्छवः सन्ति ते सौभाग्येन सम्प्राप्ताः। तन्निर्देशने एतत् कार्यम् पूर्णतां गच्छति तेषामपि अहं अधर्णोऽस्मि्।

अस्य शोधप्रबन्धस्य सम्पूर्णटंकणकार्यम्-संगणक-यन्त्रेण यद् विहितम् तत् सर्वम् डॉ. राजदेवमिश्रमहाभागेन कृतम्, एतदर्थम्

मिश्र भागः अपि धन्यवादार्हः अस्ति। तस्य अनेक विध कार्तग्यम् स्मरामि।

अस्मिन शोधप्रबन्धे मानवस्वभावतः याः काश्चन् त्रुट्योः भवेयुः ताः भवदिभिः विद्वदभिः क्षन्तव्याः।

यदत्रासौष्ठवं किञ्चत् तन्मैव गुरो र्न हि।
यदत्रसौष्ठवं किञ्चित् तन्गुरो र्न मे हि च।।

** ** ** **